# संस्कृतवार्ता:

**दिनाङ्क:-06.12.2025**

**प्रात: - 06:55**

## अथ वार्ता:

**प्रधानमन्त्री/पुतिनः/संयुक्तवक्तव्यम्**

भारत-रूस-देशाभ्यां गतवासरे रक्षया, व्यापारेण, अर्थव्यवस्थया, स्वास्थ्यसेवया, शिक्षया, संस्कृत्या प्रसारमाध्यमैः च सम्बद्धानि षोडश सन्धिपत्राणि हस्ताक्षरैः प्रमाणीकृतानि। नवदिल्ल्यां त्रयोविंशति-तमे भारत-रूस-वार्षिक-शिखर-सम्मेलने रूस-राष्ट्रपतिना व्लादिमिर्-पुतिनेन सह संयुक्त-वार्ताहर-सम्मेलनं सम्बोधयता प्रधानमन्त्रिणा नरेन्द्रमोदिना विश्वासः प्रकटितः यत् भारत-रूस-मैत्री वैश्विक-समाह्वानानि सम्मुखीकर्तुं शक्तिं प्रदास्यति। सः अवदत् यत् प्रायः पञ्चविंशति-वर्ष-पूर्वं राष्ट्रपतिः पुतिनः भारत-रूस-सामरिक-सहभागित्वस्य आधारं स्थापितवान्। अपि च, आतङ्कवादं विरुध्य कृते युद्धे भारत-रूस-देशौ युगपत् स्थितौ। आतङ्कवादं मानवतायाः मूल्यानाम् उपरि प्रत्यक्षाक्रमणम् अस्ति इति भारतस्य अटल-विश्वासं पुनरुदीरयन् श्रीमोदी अवदत् यत् आतङ्कवादं विरुद्ध्य वैश्विकी एकता एव बृहत्तमा शक्तिः अस्ति।

प्रधानमन्त्री अवदत् यत् राष्ट्रपतेः पुतिनस्य यात्रा तस्मिन् समये अभवत् यदा द्वैपाक्षिक-सम्बन्धाः अनेकानि ऐतिहासिक-लक्ष्याणि प्राप्तवन्तः। तेन उक्तं यत् गतेषु दशवर्षेषु जगता अनेकानि उत्थानानि पतनानि च दृष्टानि। परञ्च, अत्र काले भारत-रूस-सम्बन्धः सुदृढतया स्थिर: अस्ति। यूरिया-उत्पादने उभौ देशौ निकटतया सहयोगं करिष्यतः इति प्रधानमन्त्री अवदत्।

प्रधानमन्त्री अवदत् यत् उभौ पक्षौ यूरोपीयार्थिक-सङ्घेन सह मुक्तव्यापार-सन्धिं शीघ्रं समापयितुं कार्यरतौ स्तः। सः अवदत् यत् भारतं शीघ्रमेव रूस-देशस्य नागरिकाणां कृते निःशुल्कं त्रिंशत्-दिनात्मकम् ई-पर्यटक-पारगमनपत्रम् अथ च त्रिंशत्-दिनात्मकं समूह-पर्यटक-पारगमनपत्रम् इति प्रवर्तयिष्यति। उभौ नेतारौ द्वैपाक्षिक-सम्बन्धेषु प्रगतिं समीक्षितवन्तौ, परस्पर-हिताय क्षेत्रीय-वैश्विक-विषयेषु च विमृष्टवन्तौ।

**उपराष्ट्रपतिः/गुजरातम्**

उपराष्ट्रपतिः सी.पी.राधाकृष्णन् अद्य पदभार-ग्रहणानन्तरं प्रथमवारं गुजरात-राज्यं गमिष्यति। यात्रावधौ उपराष्ट्रपतिः एकता-नगरस्य स्टैचू-आफ्-यूनिटी इत्यत्र सरदार-वल्लभभाई-पटेलस्य सार्धैकशततमस्य जन्मदिवसस्य समापनसमारोहे मुख्यातिथि-रूपेण सहभागं करिष्यति।

**उड्डयनम्/नायडूः**

नागरिकोड्डयन-मन्त्री राममोहन-नायडूः अवदत् यत् इण्डिगो-विमानानां विलम्बस्य स्थगनस्य च स्थित्यां परिष्कारः भवति तथा च अद्यारभ्य विमानस्थानके प्रतीक्षा न भविष्यति इति अपेक्ष्यते। सः अवदत् यत् सर्वकारस्य प्रमुखं ध्यानं विमानस्थानके विद्यमानानां बैकलाग्स् इत्येतान् न्यूनीकर्तुम् अस्ति।

**क्रिकेट्**

भारत-दक्षिणाफ्रीका-दलयोः मध्ये अनुवर्तमानायाः पुरुषाणां क्रिकेट्-क्रीडा-मालिकायाः तृतीया अन्तिमा च स्पर्धा अद्य विशाखापत्तने ACA-VDCA-क्रीडाङ्गणे आयोजयिष्यते। इयं स्पर्धा दिने सार्धैक-वादने आरप्स्यते। ध्यातव्यमस्ति यत् मालिकायां सम्प्रति उभयम् अपि दलं प्रत्येकम् एकम् अङ्कम् अवाप्य तुल्यबलम् अस्ति। उभाभ्याम् अपि दलाभ्याम् अद्य विजयाय यथाशक्ति प्रयतिष्यते।

**।।इति वार्ताः।।**